नवमः पाठः

अतिथिदेवो भव

0672CH09

भारतीयसंस्कृतौ अतिथीनां नितरां महत्त्वम् अस्ति। **'अतिथिदेवो भव'** इति उपनिषदः वचनम् अस्ति। अस्माकं देशे न केवलं मनुष्याः, अपि तु अन्ये प्राणिनः अपि अतिथिरूपेण प्रीतिपात्राणि भवन्ति। अतिथिसेवा पञ्चमहायज्ञेषु अन्तर्भवति। **'अतिथिदेवो भव'** इति वचनेन अतिथिसेवायाः भावः सर्वेषु जागरितः भवति। तादृशः कश्चन प्रसङ्गः अत्र पाठे दर्शितः।

राधिका एषु दिनेषु कूर्दमाना एव चलति। यतः गृहे नूतनाः अतिथयः सन्ति। ते च विशिष्टाः सन्ति। माता, पुत्रौ, पुत्र्यौ च मिलित्वा ते तत्र पञ्च सन्ति। अहोरात्रं तस्याः चिन्ता एकत्र एव। गृहस्य छद्याः उपरि। तत्र एव तस्याः मनः अस्ति। कुतूहलम् अस्ति, के ते इति? ते न अन्ये, काचित् मार्जारी तस्याः चत्वारः शावकाः च। आम्, ते एव विशिष्टाः अतिथयः। सा तु तेषां नामानि अपि चिन्तितवती – तन्वी, मृद्वी, शबलः, भीमः च इति।

© NCERT not to be republished



तन्वी आकृत्या सुन्दरी, मृद्वी स्पर्शेन अतीव कोमला। शबलः चित्रवर्णः तथा च भीमः किञ्चित् स्थूलः। मार्जारी कदा गच्छति, कदा आगच्छति एतत् सर्वम् अपि राधिका जानाति। सा मार्जार्यै क्षीरं ददाति। मार्जारी पिबति। अनन्तरं सा सधन्यवादं राधिकां पश्यति। किन्तु शावकानां समीपं राधिका गच्छति चेत् मन्दं मन्दं पृष्ठतः आगच्छति। राधिकां दृष्ट्वा शावकाः भीताः न भवन्ति। पितामही राधिकायाः कार्यकलापान् दृष्ट्वा हसति।

सा राधिकां वदति – राधिके! अतिथयः कदा आगच्छन्ति इति न जानीमः। किन्तु यदा ते अत्र आगच्छन्ति तदा तेषाम् एतादृशी सेवा करणीया। राधिका पितामह्याः कण्ठं परितः मालाम् इव हस्तौ स्थापयन्ती पृच्छति – अस्तु, करोमि। किन्तु किमर्थम्? पितामही वदति – **'अतिथिदेवो भव'**। अर्थात् अतिथिः अस्माकं देवः अस्ति इति चिन्तयतु। तस्य आदरेण सेवां करोतु। राधिका आदिनं मन्त्रम् इव वारं वारं वदति – **'अतिथिदेवो भव', 'अतिथिदेवो भव'**। अनन्तरं सा तन्वीं मृद्वीं शबलं भीमं च वात्सल्येन वदति –

जानन्ति किम् **'अतिथिदेवो भव'**? भवन्तः अपि वदन्तु – **'अतिथिदेवो भव'**।

© NCERT not to be republished

वयं शब्दार्थान् जानीमः

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थं लिखन्तु
कूर्दमाना	उच्छलनं कुर्वती	कूदती हुई	Jumping (Female)	
नूतनाः	नवीनाः	नये	New	
मिलित्वा	सम्मिल्य	मिलकर	Together	
अहोरात्रम्	अहर्निशम्	दिन-रात	Day and night	
छद्याः उपरि	गृहस्य उपरितने भागे	छत के ऊपर	On the roof	
शावकाः	मार्जारस्य शिशवः	बिल्ली के बच्चे	Kitten	
मन्दं मन्दम्	शनैः शनैः	धीरे-धीरे	Slowly	
पृष्ठतः	पृष्ठभागतः	पीछे-पीछे	From the back	
कार्यकलापान्	गतिविधीन्	गतिविधियों को	Activities	
दृष्ट्वा	अवलोक्य	देखकर	Having Seen	
एतादृशाः	एतैः समानाः	इस तरह के	Like these	
स्थापयन्ती	स्थापनं कुर्वती	डालती हुई	Putting	
किमर्थम्	किं निमित्तम्	क्यों / किसलिए	Why	
आदिनम्	सम्पूर्णं दिनम्	दिन भर	Whole day	
वारं वारम्	पुनः पुनः	बार-बार	Again and again	



वयम् अभ्यासं कुर्मः

१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु—

(क) राधिका कथं चलति स्म ? – .....

(ख) गृहे कति अतिथयः सन्ति ? – .....

(ग) कां दृष्ट्वा शावकाः भीताः न भवन्ति ? – .....

(घ) मार्जार्याः कति शावकाः ? – .....

(ङ) राधिका मार्जार्यै किं ददाति ? – .....

(च) चित्रवर्णः कः अस्ति ? – .....

© NCERT not to be republished

Reprint 2026-27

२. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—

(क) मार्जारीशावकानां नामानि कानि? .....

(ख) राधिका मार्जारीशावकान् किं पाठयति? .....

(ग) विशिष्टाः अतिथयः के? .....

(घ) पितामही राधिकां किं वदति? .....

(ङ) मार्जारी कदा राधिकायाः पृष्ठतः आगच्छति? .....

(च) मार्जार्याः शावकाः कीदृशाः सन्ति? .....

३. अधोलिखितानां वाक्यानां प्रश्न-सूचक-वाक्यानि लिखन्तु—

यथा – लेखनी अत्र अस्ति। ..... लेखनी कुत्र अस्ति? .....

(क) वृक्षः तत्र अस्ति। .....

(ख) देवालयः अन्यत्र अस्ति। .....

(ग) वायुः सर्वत्र अस्ति। .....

(घ) बालकाः एकत्र तिष्ठन्ति। .....

(ङ) माता अत्र अस्ति। .....

४. उत्पीठिकायां किम् अस्ति? किं नास्ति? इति चित्रं दृष्ट्वा लिखन्तु—

पुस्तकम्, घटी, लेखनी, चषकः, कूपी, स्यूतः, सङ्गणकम्, वृक्षः, फलम्, कन्दुकः

यथा – उत्पीठिकायां पुस्तकम् अस्ति। उत्पीठिकायां घटी नास्ति।




© NCERT not to be republished

Reprint 2026-27

५. रेखाचित्रं दृष्ट्वा उदाहरणानुसारं वाक्यानि लिखन्तु—

यथा – मार्जारः कुत्र अस्ति? मार्जारः अत्र अस्ति।

सेवकः कुत्र अस्ति? सेवकः तत्र अस्ति।



६. भोजनशालायां किं किम् अस्ति? इति पञ्चभिः वाक्यैः लिखन्तु—

यथा – **भोजनशालायां पाचकः अस्ति।**

(सूचकपदानि – पाचकः, पात्रम्, तण्डुलाः, शाकानि, अग्निः, जलम्)

७. अधोलिखितेभ्यः वाक्येभ्यः अव्ययपदानि चित्वा लिखन्तु—

(क) अमितः गृहात् बहिः गच्छति। .....

(ख) एकः वानरः वृक्षस्य उपरि तिष्ठति। .....

(ग) सः फलानि अधः क्षिपति। .....

(घ) तत्र एकः बिडालः अस्ति। .....

(ङ) बिडालः गृहस्य अन्तः प्रविशति। .....

© NCERT not to be republished

Reprint 2026-27

८. उदाहरणानुसारं कः कुत्र अस्ति ? कुत्र नास्ति ? इति लिखन्तु।

सिंहः	वने	कार्यालये	सिंहः वने अस्ति। कार्यालये नास्ति।
छात्रः	आकाशे	विद्यालये	छात्रः आकाशे नास्ति। छात्रः विद्यालये अस्ति।
मत्स्यः	समुद्रे	वृक्षे	
मधुरता	मोदके	कषाये	
उष्णता	सूर्ये	चन्द्रे	
वानरः	नद्याम्	वृक्षे	
नौका	जले	पर्वते	
अज्ञानम्	पण्डिते	मूर्खे	
चन्द्रः	अमावस्यायाम्	पूर्णिमायाम्	
अवकाशः	सोमवासरे	रविवासरे	



योग्यताविस्तरः

१. एतत् गीतं सर्वेऽपि मिलित्वा पठन्तु आलपन्तु च।

मार्जाल ! रे मार्जाल ! कुत्र गतोऽसि त्वम्
अत्रैवास्मि आगतोऽस्मि राजगृहादेवम्
मार्जाल ! रे मार्जाल ! किं दृष्टं तत्र ?
तावद्दीर्घः मूषकपुत्रः न हि दृष्टोऽन्यत्र।



© NCERT not to be republished

Reprint 2026-27

२. पाठे स्थूलाक्षरैः लिखिताः शब्दाः अव्ययपदानि सन्ति। 'अत्र' इति अव्ययं परिशीलयामः।

- **अत्र** बालकः अस्ति।
- **अत्र** बालकाः सन्ति।

} द्वयोः वाक्ययोः 'अत्र' इति पदे वचनभेदः नास्ति

- **अत्र** गायिका गायति।
- **अत्र** गायकः गायति।

} द्वयोः वाक्ययोः 'अत्र' इति पदे लिङ्गभेदः नास्ति

- **अत्र** सुधाखण्डेन लेखनं भवति।
- **अत्र** गृहेषु स्वच्छता भवति।

} द्वयोः वाक्ययोः 'अत्र' इति पदे विभक्तिभेदः नास्ति

३. अव्ययलक्षणम्

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

अव्ययपदेषु वचनभेदः, विभक्तिभेदः लिङ्गभेदः च न भवति। एतानि अव्ययपदानि सर्वदा समानरूपेण वाक्ये भवन्ति।

४. निम्नलिखितानि वाक्यानि सावधानं पठन्तु लिखन्तु च।

- छात्रः अत्र अस्ति।
- क्रीडाङ्गणं तत्र अस्ति।
- कन्दुकः कुत्र अस्ति?
- नगरम् अन्यत्र अस्ति।
- परमेश्वरः सर्वत्र अस्ति।
- भोजनम् अत्र नास्ति।



© NCERT not to be republished

Reprint 2026-27



परियोजनाकार्यम्

१. पाठे मार्जारशावकानां नामानि पश्यन्तु। तेषां नामकरणे राधिकायाः किं चिन्तनम् आसीत्? तदनुसारं स्वनामधेये किम् उद्देश्यं स्यात् इति विमर्शं कुर्वन्तु।

२. विद्यालयपरिसरे किम् अस्ति, किं नास्ति इति लिखन्तु कक्षायां च श्रावयन्तु।

बिडालः कुत्र अस्ति?



उपरि




अधः




कोणे



केन्द्रे




समीपे



दूरे



अन्तः



बहिः



पुरतः



पृष्ठतः



दक्षिणतः



वामतः

© NCERT not to be republished

Reprint 2026-27